कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M2454

इति नारायण पत्रे

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2454 विषय स्तोत्र

नाव इति नारायण पत्रे

लेखक/लिपीकार नारायण

पृठ 54 काळ .... पूर्ण/~~अ~~पूर्ण

इति नारायण पत्रे

M2454

श्रीगणेशायनमः ॥ हरिःॐ ॥ सहनाववतु ॥
सहनौभुनक्तु ॥ सहवीर्यंकरवावहै ॥ तेजस्विना
वधीतमस्तुमाविद्विषावहै ॥ ॐ शांतिः शांतिः
शांतिः ॥ अंभस्यपारेभुवनस्यमध्येनाकस्यपृ
ष्ठेमहतोमहीयान् ॥ शुक्रेणज्योतींषिसमनु
प्रविष्टःप्रजापतिश्चरतिगर्भेअंतः ॥ यस्मिन्नि
दंसंचविचैतिसर्वंयस्मिन्देवाअधिविश्वेनि

षेदुः॥ तदेवभूतंतदुभव्यमाइदंतदक्षरेपरमे
व्योमन्॥ येनावृतंखंचदिवंमहींचयेनादित्यस्त
पतितेजसाभ्राजसाच॥ यमंतःसमुद्रेकवयो
वयंतियदक्षरेपरमेप्रजाः॥ यतःप्रसूताजग
तःप्रसूतीतोयेनजीवान्व्यचसर्जभूम्यां॥ यदो
षधीभिःपुरुषान्पशूंश्चविवेशभूतानिचरा
चराणि॥ अतःपरंनान्यदणीयसंहिपरात्परं

॥१॥

यन्मरुतोमृडंतं॥ यईकमव्यक्तमनंतरूपंवि
श्वंपुराणंतमसःपरस्तात्॥ तदेवर्त्तंतदुस
त्यमाहुस्तदेवब्रह्मपरमंकवीनां॥ इष्टापूर्त्तं
बहुधाजातंजायमानंविश्वंबिभर्त्तिभुवन
स्यनाभिः॥ तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचं
द्रमाः॥ तदेवशुक्रममृतंतद्ब्रह्मतदापःस
प्रजापतिः॥ सर्वेनिमेषाजज्ञिरेविद्युतःपु

रुषादधि॥ कलामुहूर्त्ताः काष्ठाश्चाहोरात्राश्च
सर्वशः॥ अर्धमासा मासा ऋतवः संवत्सर
श्चकल्पंतां॥ स आपः प्रदुघे उभे इमे अंतरि
क्षमथोसुवः॥ नैनमूर्ध्वं न तिर्यंचं न मध्ये प
रिजग्रभत्॥ न तस्येशे कश्चन तस्य नाम मु
हद्यशः॥२॥ न संदृशे तिष्ठति रूपमस्य न च
क्षुषा पश्यति कश्चनैनं॥ हृदा मनीषा मनसा

॥३

भिर्हूतो य एनं विदुरमृतास्ते भवंति ॥ अद्भ्यः
संभृतो हिरण्यगर्भ इत्येषो ॥ एष हि देवः प्र
दिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अं
तः ॥ स विजायमानः स जनिष्यमाणः प्र
त्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥ विश्वतः
श्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत वि
श्वतस्पात् ॥ संबाहुभ्यां नमति संपतत्रैर्द्या

वापृथिवीजनयंदेव एकः ॥ वेनस्तत्पश्यन्वि
श्वाभुवंनानिविद्वान्यत्रविश्वंभवत्येकनीडं॥
यस्मिन्निदꣳसंचविचैकꣳसओतः प्रोतश्च
विभुः प्रजासु॥ प्रतद्वोचेअमृतन्नुविद्वान्
गंधर्वोनामनिहितंगुहासु॥ त्रीणिपदा
निहितागुहासुयस्तद्वेदसवितुःपितासत्॥
सनोबंधुर्जनितासविधाताधामानिवेदभु

॥ ७ ॥

वनानि विश्वा ॥ यत्र देवा अमृतमानशाना
स्तृतीये धामन्नध्यैरयंत ॥ परि द्यावापृथिवी
यंति सद्यः परि लोकान्परि दिशः परि सुवः ॥
ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तदभव
त्प्रजासु ॥ परीत्य लोकान्परीत्य भूतानि परीत्य
सर्वाः प्रदिशो दिशश्च ॥ प्रजापतिः प्रथमजा
ऋतस्यात्मनात्मानमभिसंबभूव ॥ सदस

स्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं॥ सनिंमेधाम
यासिषं॥ उद्दीप्यस्वजातवेदोपघ्नंनिर्ऋतिंमम
॥ध॥ पशूंश्चमह्यमावहजीवनंचदिशोदिश॥
मानोहिंसीज्जातवेदोगामश्वंपुरुषंजगत्॥
अबिभ्रदग्नआगहिश्रियामापरिपातय॥ पु
रुषस्यविद्मसहस्राक्षस्यमहादेवस्यधीमहि॥
तन्नोरुद्रःप्रचोदयात्॥ तत्पुरुषायविद्महे

॥५॥

महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥
तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दं
तिः प्रचोदयात्॥ तत्पुरुषाय विद्महे चक्र
तुंडाय धीमहि। पा। तन्नो नंदिः प्रचोदया
त्॥ तत्पुरुषाय विद्महे महासेनाय धीमहि
। तन्नः षण्मुखः प्रचोदयात्॥ तत्पुरुषाय वि
द्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचो

दयात्॥ वेदात्मनाय विद्महे हिरण्यगर्भाय धी
महि। तन्नो ब्रह्म प्रचोदयात्॥ नारायणाय
विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचो
दयात्॥ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धी
महि॥ ही॥ तन्नो नारसिंहः प्रचोदयात्॥ भा
स्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो
आदित्यः प्रचोदयात्॥ वैश्वानराय विद्महे

लालीलायं धीमहि ॥ तन्नो अग्निः प्रचोदया
त् ॥ कात्यायनाय विद्महे कन्यकुमारि धीम
हि ॥ तन्नो दुर्गिः प्रचोदयात् ॥ सहस्रपरमा
देवी शतमूला शतांकुरा ॥ सर्वं हरतु मे पा
पं दूर्वा दुःस्वप्ननाशनी ॥ कांडात्कांडात्प्ररोहंती
परुषः परुषः परि ॥ ७ ॥ एवा नो दूर्वे प्रतनु सह
स्रेण शतेन च ॥ या शतेन प्रतनोषि सहस्रे

ण विरोहसि॥ तस्यांस्ते देवीष्टके विधेमहवि
षावयं॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसु
धेरा॥ शिरसोधारयिष्यामि रक्षस्व मां पदेपदे॥
भूमिर्धेनुधरणी लोकधारिणी॥ उद्धृतासि वे
राहेन कृष्णेन शतबाहुना॥ मृत्तिके हनमे पा
पं यन्मया दुष्कृतं कृतं॥ मृत्तिके ब्रह्मदत्तासि
काश्यपेनाभिमंत्रिता॥ मृत्तिके देहि मे पुष्टिं

॥ ६॥

त्वयिसर्वंप्रतिष्ठितं ॥७॥ मृत्तिकेप्रतिष्ठितेस
र्वंतन्मेनिर्णुद मृत्तिके । तयाहृतेनपापेनगछा
मिपरमांगतिं ॥ यतइंद्र भयामहे ततोनोअ
भयंकृधि ॥ मघवंच्छग्धितवतन्नऊतयेविद्वि
षोविमृधोजहि ॥ स्वस्तिदाविशस्पतिर्वृत्रहा
विमृधोवशी ॥ वृषेंद्रःपुरएतुनः स्वस्तिदाअ
भयंकरः ॥ स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनः

पूषाविश्ववेदाः॥स्वस्तिनस्तार्क्ष्योअरिष्टनेमि
स्वस्तिनोबृहस्पतिर्दधातु॥आपांतमन्युस्तृप
लप्रभर्माधुनिःशिमिवांछरुमां ऋजीषी॥सो
मोविश्वान्यतसावनानिनार्वागिंद्रंप्रतिमा
नानिदेभुः॥१॥ब्रह्मजज्ञानंप्रथमंपुरस्ता
द्विसीमतःसुरुचोवेनआवः॥सबुध्न्या
उपमाअस्यविष्ठाःसतश्चयोनिमसतश्च

विचः॥ स्योनापृथिविभवान्नृक्षरानिवेशा
नी॥ यछानः शर्मसप्रथाः॥ गंधद्वारांदुरा
धर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभू
तानां तामिहोपह्वये श्रियं॥ श्रीर्मे भजतु॥
अलक्ष्मीर्मे नश्यतु॥ विष्णुमुखावैदेवा छं
दोभिरिमांल्लोकाननपजय्यमभ्यजयन्॥
महांइंद्रोवज्रबाहुः षोडशीशर्मयछतु॥१०॥

स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मां
द्वेष्टि॥ सोमानंस्वरणंकृणुहिब्रह्मणस्पते॥
कक्षीवंतंयऔशिजं॥ शरीरंयज्ञशमलं
कुसीदंतस्मिंत्सीदतुयोस्मांद्वेष्टि॥ चरणप
वित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृता
नि॥ तेनपवित्रेणशुद्धेनपूताअतिपाप्मान
मरातिंतरेम॥ सजोषाइंद्रसगणोमरुद्भि

॥८

सोमंपिबत्वृत्रहंशूरविद्वान्॥जहिशत्रूं
रपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥
सुमित्रानआपओषधयःसंतुदुर्मित्रास्तस्मै
संतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥आपोहि
ष्ठामयोभुवस्तानऊर्जेदधातन॥१॥महेरणा
यचक्षसे॥योवःशिवतमोरसस्तस्यभाजय
तेहनः॥उशतीरिवमातरः॥तस्माअरंगमाम

मवोयस्यक्षयायजिन्वथ ॥ आपोजनयथा
चनः ॥ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहि
याचितः ॥ यन्मयाभुक्तमसाधूनांपापेभ्यः
श्चप्रतिग्रहः ॥ यन्मेमनसावाचाकर्मणावा
दुष्कृतंकृतं ॥ तन्नइंद्रोवरुणोबृहस्पतिःसवि
ताचपुनंतुपुनःपुनः ॥ नमोग्नयेप्सुमतेनम
इंद्रायनमोवरुणायनमोवारुण्यैनमोद्भ्यः ॥

॥१४॥ यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छ
तात्॥ अत्याशनादतीपानाद्यच्चउग्रात्प्रति
ग्रहात्॥ तन्मो वरुणो राजा पाणिना ह्यवम
र्शतु॥ सोऽहमेपापो विरजो निर्मुक्तो मुक्तकि
ल्बिषः॥ नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोक
तां॥ यश्चाप्सु वरुणः सपुनात्वघमर्षणः॥
इमं मे गंगे यमुने सरस्वति सुतुद्रि स्तोमं

सचतापरुष्णिया॥ असिक्नियामरुद्वृधेवि
तस्तयार्जीकीयेशृणुह्यासुषोमया॥ ऋतंच
सत्यंचाभीद्धात्तपसोध्यजायत॥ ततोरात्रि
रजायततततः समुद्रो अर्णवः॥१३॥ समुद्रा
दर्णवादधिसंवत्सरोअजायत॥ अहोरात्राणि
विदधद्विश्वस्यमिषतोवशी॥ सूर्याचंद्रमसौ
धातायथापूर्वमकल्पयत्॥ दिवंचपृथिवीं

यांतरिक्षमथोसुवः॥ यत्पृथिव्यांरजःस्वमां
तरिक्षेविरोदसी॥ इमांस्तदापोवरुणःपुना
त्वघमर्षणः॥ पुनंतुवसवःपुनातुवरुणःपुना
त्वघमर्षणः॥ एषभूतस्यमध्येभुवनस्यगोप्ता॥
एषपुण्यकृतांलोकानेषमृत्योर्हिरण्मयं॥ द्या
वापृथिव्योर्हिरण्मयंसंश्रितंसुवः॥१४॥
सनःसुवःसंशिशाधि॥ आर्द्रंज्वलतिज्योति

रहमस्मि ॥ ज्योतिर्ज्वलति ब्रह्माहमस्मि ॥ यो
हमस्मि ब्रह्माहमस्मि ॥ अहमस्मि ब्रह्माहम
स्मि ॥ अहमेवाहं मां जुहोमि स्वाहा ॥ अका
र्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः
वरुणोपामघमर्षणः स्तस्मात्पापात्प्रमुच्य
ते ॥ रजोभूमिस्त्वमां रोदयस्व प्रवदंति धी
राः ॥ आक्रान्तसमुद्रः प्रथमे विधर्मं जन

॥११॥

यन्त्रा जा भुवन सम्राजा ॥ वृषा पवित्रे अग्निस
नो अग्ने बृहः सोमो वायघे सुवानं दुः ॥ १५॥
पुरस्ताच घ्रो गुह्य सुममं च क्रतुं ऊ य यी महि
तीक्ष्णा हङ् श्रूय यी महि परि प्रतिष्ठितं रे सुर्यं
घतुह यातना ध्योर्णवः सुवो राजे कं च ॥ १ ॥ रु
द्रो रुद्र श्चं दं ति श्च नं रिः षं स्मु रवएवं च ॥ ग्र
रुजे ब्रल्ते वि सु श्च नार सिंहुं स्तै पै व च ॥ आ

हिसोग्निश्चदुर्गिष्वक्रमेणद्वादशांमसि॥म
मेवचमसुवेनावभोवैकात्यायपुनाय॥जात
वेदसेसुनवामसोममरातीयतोनिदहा
तिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावे
वसिंधुंदुरितात्यग्निः॥तामग्निवर्णांतपसा
ज्वलंतींवैरोचनींकर्मफलेषुजुष्टां॥दुर्गां
देवींशरणमहंप्रपद्येसुतरसितरसेन

॥१२॥

मेः॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभि
रति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उ
र्वी भवा तोकाय तनयाय शं योः॥ विश्वानि
नो दुर्गहा जातवेदः सिंधुं न नावा दुरिताति
पर्षि॥ अग्ने अत्रिवन्मनसा गृणानो स्माकं बो
ध्यविता तनूनां॥ पृतनाजितं सहमानमु
ग्रमग्निं हुवेम परमात्सधस्थात्॥ स नः प

र्षु ह ति इ गा गि वि म्या स्मा म दृ वो अ ति इ रि ता
त्य ग्निः ॥ अ न्नो षि क मो ऽ यो अ ध्वे र षु स ना श्च
हो ता न र्ये श्च स त्सि ॥ स्यां चा ग्ने त नु वं पि प्र य
स्या स्म र्यं च सो मे ग मा ये ज स्य ॥ गो भि र्जु ह्वे म
यु जो नि षिं क्ष त वे न्द्र वि स्रो र तु सं चै र म ॥ ना
के स्य पृ ष्ठ म भि सं व सा नो वे लो वीं लो क रु मां
दं य तं ॥ २ ॥ म र न्ते म ग्न र्ये प्र पि ये स्या हा न्वे वो

ग्नेंवायवेंतरिक्षायस्वाहासुवरग्नेमादित्याय
दिवेस्वाहाभूर्भुवःसुवरग्नेचंद्रमसेदिग्भ्यः
स्वाहानमौदिवेभ्यःस्वधापितृभ्योभूर्भुवःसु
वरग्नेमो ॥३॥ भूरग्नयेपृथिव्यैस्वाहाभुवोवा
यवेंतरिक्षायस्वाहासुवरादित्यायदिवेस्वाहा
भूर्भुवःसुवःश्चंद्रमसेदिग्भ्यःस्वाहानमोदे
वेभ्यःस्वधापितृभ्योभूर्भुवःसुवरग्नॐ ॥४॥

भूरग्नयेचपृथिव्यैचमहतेचस्वाहाभुवो
वायवेचांतरिक्षायचमहतेचस्वाहासुवरा
दित्यायचदिवेचमहतेचस्वाहाभूर्भुवःसु
वश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहते
चस्वाहानमोदेवेभ्यःस्वधापितृभ्योभूर्भुवः
सुवर्महरों॥१॥पाहिनोअग्नएनसेस्वाहा
पाहिनोविश्ववेदसेस्वाहा॥यज्ञंपाहिविभा

वसो स्वाहा ॥ सर्वं पाहि शतक्रतो स्वाहा ॥ ३ ॥ पा
हि नो अग्न एकया ॥ पाह्युत द्वितीयया ॥ पाह्यू
र्जं तृतीयया ॥ पाहि गीर्भिश्चतसृभिर्वसो स्वा
हा ॥ ४ ॥ यश्छंदसामृषभो विश्वरूपश्छंदोभ्य
श्छंदाꣳस्याविवेश ॥ सचाꣳशिक्यः पुरोवाचो
पनिषदिंद्रो ज्येष्ठ इंद्रियाय ऋषिभ्यो नमो दे
वेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ओं ॥ ५ ॥

नमोब्रह्मणेधारणंमेअस्त्वनिराकरणंधारइ
ताभूयासंकर्णयोश्रुतंमाच्योढंममामुष्यॐ
॥१॥ऋतंतपःसत्यंतपःश्रुतंतपःशांतंतपो
दमस्तपःशमस्तपोदानंतपोयज्ञंतपोभूर्भु
वःसुवर्ब्रह्मैतदुपास्यैतत्तपः॥१०॥यथावृक्ष
स्यसंपुष्पितस्यदूराद्गंधोवात्येवंपुण्यस्यक
र्मणोदूराद्गंधोवातियथासिधारांकर्त्तेवहि

॥१५।

तामवृक्रामेयद्युवेषुवेरुवोविकृईष्यामिक्
र्तंपतिष्यामीसेवमुमृतोहात्मानंजुगुप्सेत्॥
११॥ अणोरणीयान्महतोमहीयानात्मागुहा
यान्निहितोस्यजंतोः॥ तमक्रतुंपश्यतिवी
तशोकोधातुःप्रसादान्महिमानमीशं॥ सप्त
प्राणाःप्रभवंतितस्मात्सप्तार्चिषःसमिधः
सप्तजिह्वाः॥ सप्तइमेलोकायेषुचरंतिप्राणा

गुहाशयान्निहिताः सप्तसप्त॥ अतः समु
द्रागिरयश्च सर्वे स्मात्स्यंदंते सिंधवः सर्व
रूपाः॥ अतश्च विश्वा ओषधयो रसाश्च
येनैष भूतस्तिष्ठत्यंतरात्मा॥ ब्रह्मा देवानां
पदवीः कवीनामृषिर्विप्राणां महिषो मृगा
णां॥ श्येनो गृध्राणां स्वधितिर्वनानां सो
मः पवित्रमत्येति रेभन्॥ अजामेकां लो

॥१श्री॥

हितः शुक्लकृष्णां बह्वीं प्रजां जनयंतीं स
रूपां ॥ अजो ह्येको जुषमाणोनुशेते जहात्ये
नां भुक्तभोगामजोन्यः ॥ १ ॥ हंसः शुचिष
द्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोण
सत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा
ऋतजा अद्रिजा ऋतं बृहत् ॥ घृतं मिमिक्षे
घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धा

मे॥ अनुष्टुप्य मावरु मा ह यस्य त्याशं रूतं व
ष मनव क्षिरुद्ध्यं॥ समुद्रादूर्मिर्मधुमाँ उदार
दुपांशुना सममृतत्वमानट्॥ घृतस्य नाम
गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥
वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारया
मा नमोभिः॥ उप ब्रह्मा शृणवच्छस्यमानं
चतुःशृंगोवमीद्गौर एतत्॥ चत्वारि शृंगा

त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ॥
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ
आविवेश ॥ त्रिधा हितं पणिभिर्गुह्यमानं ग
वि देवासो घृतमन्वविंदन् ॥ इंद्र एकꣳ सूर्य
एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥
यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो म
हर्षिः ॥ हिरण्यगर्भं पश्यत जायमानꣳ स नो

देवः स्तुमे यास्म्मस्या संयुनक्तु ॥ यस्मात्परन्ना
परमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति क
श्चित् ॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेने
दं पूर्णं पुरुषेण सर्वं ॥ न कर्मणा न प्रजया धने
न त्यागेनैके अमृतत्वमानशुः ॥ परेण नाकं नि
हितं गुहायां विभ्राजते यद्यतयो विशंति ॥
वेदांतविज्ञानसुनिश्चितार्थाः सन्यासयो

गाद्यतयः शुद्धसत्वाः॥ तेब्रह्मलोकेतुपरांत
कालेपरामृतात्परिमुच्यंतिसर्वे दह्रंविपा
पंपरमेश्मभूतंयत्पुंडरीकंपुरमध्यसंस्थं
तत्रापिदह्रंगगनंविशोकस्तस्मिन्यदंतस्त
दुपासितव्य॥ योवेदादौस्वरःप्रोक्तोवेदांते
चप्रतिष्ठितः॥ तस्यप्रकृतिलीनस्ययःपरः
समहेश्वरः॥ ४॥ अजोन्यआविवेत्रा सर्वेच

त्यानि च ॥ १२ ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्व
शंभुवं ॥ विश्वं नारायणं देव मक्षरं परमं पदं ॥
विश्वतः परमान्नित्यं विश्वं नारायणं हरिं ॥
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ प
तिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्यु
तं ॥ नारायणं महाज्ञेयं विश्वात्मानं पराय
णं ॥ नारायणपरोज्योतिरात्मा नारायणः

परः॥ नारायणपरं ब्रह्मतत्वं नारायणः प
रः॥ नारायणपरो ध्याता ध्यानं नारायणः
परः॥ यच्चकिंचिज्जगत्सर्वं दृश्यते श्रूयते
पिवः॥१॥ अंतर्बहिश्च तत्सर्वं व्याप्य नाराय
णस्थितः॥ अनंतमव्ययं कविं समुद्रेंतं वि
श्वशंभुवं॥ पद्मकोशप्रतीकाशं हृदयं चा
प्यधोमुखं॥ अधोनिष्ट्या वितस्त्यांते नाभ्या

मुपरितिष्ठति॥ ज्वालमालाकुलंभातिविश्व
स्यायतनंमहत्॥ संततंशिलाभिस्तुलंब
त्याकोशसन्निभं॥ तस्यांतेसुषिरंसूक्ष्मंत
स्मिंसर्वंप्रतिष्ठितं॥ तस्यमध्येमहानग्निर्वि
श्वार्चिर्विश्वतोमुखः॥ सोग्रेभुग्विभजंतिष्ठं
न्नाहारमजरःकविः॥ तिर्यगूर्ध्वमधःशायी
रश्मयस्तस्यसंतता॥ संतापयतिस्वंदेहमा

पादतलमस्तकः॥ तस्य मध्ये वह्निशिखा
अणीयोर्ध्वा व्यवस्थितः॥ नीलतोयदमध्य
स्थाद्विद्युल्लेखेव भास्वरा॥ नीवारशूकव
तन्वी पीता भास्वत्यणूपमा॥ तस्याः शिख
यामध्ये परमात्मा व्यवस्थितः॥ स ब्रह्म स शि
वः स हरिः सेद्रः सोक्षरः परमस्वराट्॥२॥
अपि वा संततापघ्ने॥१२॥ आदित्यसोचाए षट्

तन्मंडलं तपति तत्र ता ऋचस्स ऋचां मंड
लꣳ स ऋचां लोकोथ य एष एतस्मिन्मंडलेर्चि
र्दीप्यते तानि सामानि स साम्नां लोकोथ य
एष एतस्मिन्मंडलेर्चिषि पुरुषस्तानि यजू
ꣳषि स यजुषा मंडलꣳ स यजुषां लोकः सैषा
त्रय्येव विद्या तपति य एषोंतरादित्ये हिर
ण्मयः पुरुषः ॥ आदित्यो वै तेज ओजो बलं

यश्चाश्चक्षुः श्रोत्रं मात्मा मनो मन्यु मेत्तु मृ
स्यः सयो मित्रो वायुराकाशः प्राणो लोकपा
लः कः किं कं तत्सत्यमन्नममृतो जीवो विश्वः
कतमः स्वयंभु ब्रह्मैतदमृत एष पुरुष ए
ष भूतानामधिपतिर्ब्रह्मणः सायुज्यं
सलोकतामाप्नोत्येतासामेव देवतानां
सायुज्यं सार्ष्टितां समानलोकतामाप्नो

त्रिय एवं वेदेत्युपनिषत्॥१॥१५॥ निधनप
तये नमः॥ निधनपतांतिकाय नमः॥ ऊर्ध्वा
य नमः॥ ऊर्ध्वलिंगाय नमः॥ हिरण्याय न
मः॥ हिरण्यलिंगाय नमः॥ सुवर्णाय नमः
॥ सुवर्णलिंगाय नमः॥ दिव्याय नमः॥ दिव्य
लिंगाय नमः॥ भवाय नमः॥ भवलिंगाय न
मः॥ शर्वाय नमः॥ शर्वलिंगाय नमः॥ शि

वायनमः॥ शिवलिंगायनमः॥ ज्वलायनमः॥
ज्वललिंगायनमः॥ आत्मायनमः॥ आत्म
लिंगायनमः॥ परमायनमः॥ परमलिंगा
यनमः॥ एतत्सोमस्य सूर्यस्य सर्वलिंगं
स्थापयति पाणिमंत्रं पवित्रं॥१॥ सद्योजातं
प्रपद्यामि सद्योजाताय वै नमो नमः॥ भवे
भवे नातिभवे भवस्व मां॥ भवोद्भवायनमः॥१॥

वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमो
रुद्रायनमः कालायनमः कलविकरणाय
नमोबलविकरणायनमोबलायनमोबलप्र
मथनायनमः सर्वभूतदमनायनमोमनो
न्मनायनमः ॥१॥ अघोरेभ्योथघोरेभ्योघोर
घोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअ
स्तुरुद्ररूपेभ्यः ॥२॥ तत्पुरुषाय विद्महे महा

देवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ २ ॥ ईशा
नः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधि
पतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा
शिवों ॥ १ ॥ नमो हिरण्यबाहवे हिरण्यवर्णाय
हिरण्यरूपाय हिरण्यपतयेंबिकापतय उमा
पतये पशुपतये नमो नमः ॥ १ ॥ ऋतं सत्यं प
रं ब्रह्म पुरुषं कृष्णपिंगलं ॥ ऊर्ध्वरेतं विरूपाक्षं

विश्वरूपाय वै नमो नमः ॥ ३ ॥ सर्वो वै रुद्रः स्त
स्मै रुद्राय नमो अस्तु ॥ पुरुषो वै रुद्रः सन्महो न
मो नमः ॥ विश्वं भूतं भुवनं चित्रं बहुधा जातं
जायमानं च यत् ॥ सर्वो ह्येष रुद्रः स्तस्मै रुद्रा
य नमो अस्तु ॥ ४ ॥ कद्रुद्राय प्रचेतसे मीढुष्ट
माय तव्यसे ॥ वोचेम शंतमं हृदे ॥ सर्वो ह्येष
रुद्र स्तस्मै रुद्राय नमो अस्तु ॥ यस्य वैकंकत्यग्नि

लेच्रुरुर्वेलीनभवतिप्रसेवास्याहुतयस्तिष्ठंत्य
योप्रतिष्ठिते ।।१।।स्तुणुष्वपाजस्रतिपंच ।।१।। अदि
तिर्देवागंधर्वामनुष्याःपितरोसुरास्तेषांसं
र्वभूतानांमातामेदिनीमहतामहीसावित्रीगा
यत्रीजगत्युर्वीपृथ्वीबहुलाविश्वाभूताकतमा
कायासासत्येत्यमृतेतिवसिष्ठः ।।१।। आपोवा
इदंसर्वंविश्वाभूतान्यापःप्राणावाआपःपशु

व आपोन्नमापोमृतमापः सम्राडापोविराडा
पः स्वराडापश्छंदाꣳस्यापोज्योतीꣳष्यापोय
जूꣳष्यापः सत्यमापः सर्वा देवता आपोभू
र्भुवः सुवराप ॐ ॥१॥ आपः पुनंतु पृथिवीं
पृथिवीपूता पुनातु माम् ॥ पुनंतु ब्रह्मण
स्पतिर्ब्रह्मपूता पुनातु माम् ॥ यदुच्छिष्टम
भोज्यं यद्वा दुश्चरितं मम ॥ सर्वं पुनंतु मामा

पोसतांचप्रतिग्रहं स्वाहा ॥ ५ ॥ अग्निश्च
मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ॥ पापे
भ्यो रक्षंतां ॥ यदह्ना पापमकार्षं ॥ मनसा वा
चा हस्ताभ्यां ॥ पद्भ्यामुदरेण शिश्ना ॥ अहस्त
दवलुंपतु ॥ यत्किंचदुरितं मयि ॥ इदमहं मा
ममृतयोनौ ॥ सत्ये ज्योतिषि जुहोमि स्वाहा
॥ ६ ॥ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्यु

कृतेभ्यः॥ पापेभ्यो रक्षंतां॥ यद्रात्रिया पाप
मकार्षं॥ मनसा वाचा हस्ताभ्यां॥ पद्भ्यामुद
रेण शिश्ना॥ रात्रिस्तदवलुंपतु॥ यत्किंचिद्दु
रितं मयि॥ इदमहं माममृतयोनौ॥ सूर्ये ज्यो
तिषि जुहोमि स्वाहा॥ १॥ ॐमित्येकाक्षरं ब्र
ह्म॥ अग्निर्देवता ब्रह्म इत्यार्षं॥ गायत्रं छंदं
परमात्मं सरूपं॥ सायुज्यं विनियोगं॥ ४॥

आयातु वरदा देवी अक्षरं ब्रह्मसंमितं ॥ गा
यत्री छंदसां मातेदं ब्रह्म जुषस्व मे ॥ यदह्ना
त्कुरुते पापं तदह्नात्प्रतिमुच्यते ॥ यद्रात्रिया
त्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते ॥ सर्ववर्णे
महादेवी संध्याविद्ये सरस्वति ॥ पू ॥ ओजोसि स
होसि बलमसि भ्राजोसि देवानां धामनामासि
विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभू

रीं गायत्रीमावाहयामि सावित्रीमावाहयामि
सरस्वतीमावाहयामि छंदऋषीनावाहयामि
श्रियमावाहयामि गायत्रियागायत्रीछंदोवि
श्वामित्रऋषिः सविता देवताअग्निर्मुखंब्र
ह्माशिरोविष्णुहृदयंरुद्रः शिखापृथिवी
योनिः प्राणापानव्यानोदानसमानासप्राणा
श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्वि

॥२८॥

पं ज्ञात्यस्सरा त्रिपदा षट्कुक्षिः पंचशीर्षोप
नयने विनियोगः ॐ भूः ॥ ॐ भुवः ॥ ॐ पं स्वः ॥
ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ॐ सत्यं ॥ ॐ त
त्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो
नः प्रचोदयात् ॥ ओमापो ज्योतीरसोमृतं ब्रह्म
भूर्भुवः स्वरों ॥ १० ॥ उत्तमे शिखरे जाते भूम्यां
पर्वत मूर्धनि ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ दे

वियथासुख॥ स्तुतो मयावरदावेदमाताप्र
चोदयंतीपवने द्विजाता॥ आयुः पृथिव्यांद्र
विणंब्रह्मवर्च्चसंमह्यंदत्वाप्रजातुंब्रह्मलोकं
॥१४॥ घृणिः सूर्य आदित्योन प्रभावात्यक्षरं॥
मधुक्षरंतितद्रसं॥ सत्यंवैतद्रसमापोज्यो
तिरसोमृतंब्रह्मभूर्भुवःसुवरों॥१५॥ ब्रह्ममे
तुमां॥ मधुमेतुमां॥ ब्रह्ममेवमधुमेतुमां॥ या

स्ते सोम प्रजावत्सोऽभि सो अहं॥ दुष्वप्नहं दुरु
ष्वहः॥ यास्ते सोम प्राणाꣳ स्तां जुहोमि॥ त्रिसु
पर्णमयाचितं ब्राह्मणाय दद्यात्॥ ब्रह्महत्यां
वा एते घ्नंति॥ ये ब्राह्मणास्त्रिसुपर्णं पठंति॥
ते सोमं प्राप्नुवंति॥ आसहस्रात्पंक्तिं पुनंति॥
१४॥ ॐ ब्रह्ममेधया॥ मधुमेधया॥ ब्रह्ममेव
मधुमेधया॥ अद्या नो देव सवितः प्रजाव

स्वाधीःसोमंगं॥ परादुष्वप्न्यं सुव॥ विश्वा
निदेवसवितर्दुरितानिपरासुव॥ यद्भद्रंत
न्नआसुव॥ मधुवाताऋतायतेमधुक्षरं
तिसिंधवः॥ माध्वीर्नःसंत्वोषधीः॥ मधुन
क्तमुतोषसिमधुमत्पार्थिवं रजः॥ मधु
द्यौरस्तुनःपिता॥ मधुमान्नोवनस्पतिर्म
धुमां अस्तुसूर्यः॥ माध्वीर्गावोभवंतुनः॥

॥२१॥

यदु मे त्रिसुपर्णमयाचितं ब्राह्मणाय दद्या
त्॥ भ्रूणहत्यां वाएते घ्नंति॥ ये ब्राह्मणास्त्रिसु
पर्णं पठंति॥ ते सोमं प्राप्नुवंति॥ आसहस्रात्पं
क्तिं पुनंति॥ ॐ ब्रह्ममेधवा॥ मधुमेधवा॥ ब्र
ह्ममेव मधुमेधवा॥ ब्रह्मा देवानां पदवीः क
वीनामृषिर्विप्राणां महिषो मृगाणां॥ श्येनो
गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्र

मस्यैत्तिरेमन्ने। हंसःशुचिषद्वसुरंतरिक्षस
द्धोतावेदिषदतिथिर्दुरोणसत्। नृषद्वरस
दृतसद्व्योमसदब्जागोजाऋतजाअद्रिजा
ऋतंबृहत्। ऋचेत्वारुचेत्वासमित्स्रवं
तिसरितोनधेनाः॥ अंतर्हृदामनसापू
यमानाः॥ घृतस्यधाराअभिचाकशीमि॥
हिरण्ययोवेतसोमध्यआसां। तस्मिंत्सुप

गौमिधुसुतक्ष्णांयीमनजैंनास्तेमधुदेवताभ्यः॥
तस्यासस्तेहरयःसप्ततीरेस्वधांदुहानाअ
मृतंस्यधारां॥यइदंत्रिसुपर्णमयाचितंब्रा
ह्मणायदद्यात्॥वीरहत्यांवाएतेघ्नंति॥येब्रा
ह्मणास्त्रिसुपर्णंपठंति॥तेसोमंप्राप्नुवंति॥आ
सहस्रात्पंक्तिंपुनंति॥१६॥ॐमेधादेवीजु
षमाणानआगाद्विश्वाचिभद्रासुमनस्यमाना॥

त्वयाजुष्टानुदमानादुरक्तान्बृहद्वदेमवि
दथेसुवीराः॥ त्वयाजुष्टऋषिर्भवतिदेवि
त्वयाब्रह्मागतश्रीरुतत्वया॥ त्वयाजुष्टश्चि
त्रंविंदतेवसुसानोजुषस्वद्रविणोनमेधे॥
मेधांमइंद्रोददातुमेधांदेवीसरस्वती॥ मे
धांमेअश्विनावुभावाधत्तांपुष्करस्रजा॥ अ
प्सरासुचयामेधागंधर्वेषुचयन्मनः॥ दै

वीं मेधा सरस्वति सा मां मेधा सुरभिर्जुषता
ं स्वाहा ॥४॥ आ मां मेधा सुरभिर्विश्वरूपा
हिरण्यवर्णा जगती जगंम्या ॥ ऊर्जस्वति पय
सा पिन्वमाना सा मां मेधा सुप्रतीका जुषंतां ॥
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु म
यि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु म
यि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु

।।१८।। अपैतु मृत्युरमृतंन्न आगन्वैवस्वतो नो
अभयं कृणोतु ।। पर्णं वनस्पतेरिवाभि नः शी
यतां रयिः सचतान्नः शचीपतिः ।।१९।। परं
मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवया
नात् ।। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्र
जां रीरिषो मोत वीरान् ।। वातें प्राणं मनसा
न्वारभामहे प्रजापतिर्यो भुवनस्य गोपाः ।।

सनोमृत्योस्त्रायतांपात्वंहसोज्योग्जीवा
जरामशीमहि ॥ अमुत्रभूयादधयद्यमस्य
बृहस्पते अभिशस्तेरमुंचः ॥ प्रत्यौहतामश्वि
नामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥
॥ ५ ॥ हरींहरंतमनुयंतिदेवाविश्वस्येशानं
वृषभंमतीनां ॥ ब्रह्मसरूपमनुमेदमागादय
नंमाविवधीर्विक्रमस्व ॥ २५ ॥ शात्यैरग्निर्मे

यानउभौलोकौसनेमृडं ।। उभयोर्लोकयोर्ऋ
ध्वातिमृस्कंतेराम्मृडं ।। २६ ।। माछिंदोमस्रसोमाव
धीर्मीमेवलंविवृहोमांप्रमोषीः ।। प्रजांमा
मेरीरिषुआयुरुग्रनृचक्षसंत्वाहविषावि
धेम ।। २७ ।। मानोमहांतमुतमानोअर्भकं
मानउक्षंतमुतमानउक्षीतं ।। मानोवधीःपि
तरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषः ।।

।।३२।।

॥२८॥ मानस्तोकेतनयेमानआयुषिमानो
गोषुमानोअश्वेषुरीरिषः॥ वीरान्मानोरुद्र
भामितोवधीर्हविष्मंतोनमसाविधेमते॥२९॥
प्रजापतेनत्वदेतांन्यन्योविश्वाजातानिप
रिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोअस्तु
वयंस्यामपतयोरयीणां॥३०॥ स्वस्तिदावि
शस्पतिर्वृत्रहाविमृधोवशी॥ वृषेंद्रःपुरए

तुनः स्वस्तिहाअभयंकरः ॥२१॥ त्र्यंबकंयजा
मेहेसुगंधिंपुष्टिवर्द्धनं ॥ उर्वारुकमिवबंध
नान्मृत्योर्मुक्षीयमामृतात् ॥२२॥ येतेसह
स्रंमयुतंपाशामृत्योमर्त्यायहंतवे ॥ तान्यज्ञ
स्यमाययासर्वानवयजामहे ॥२३॥ मृत्यवेस्वा
हामृत्यवेस्वाहा ॥२४॥ देवकृतस्यैनसोवय
जनमसिस्वाहा ॥ मनुष्यकृतस्यैनसोवयज

नमसिस्वाहा॥ पितृकृतस्यैनसोवयजनम
सिस्वाहा॥ आत्मकृतस्यैनसोवयजनमसि
स्वाहा॥ अन्यकृतस्यैनसोवयजनमसिस्वा
हा॥ अस्मत्कृतस्यैनसोवयजनमसिस्वाहा॥
यद्दिवाचनक्तंचैनश्चकृमतस्यावयजनमसि
स्वाहा यत्स्वपंतश्चजाग्रतश्चैनश्चकृमत
स्यावयजनमसिस्वाहा॥ यत्सुषुप्तश्चजाग्र

तुश्चैनश्चकृमतस्यावयजेनमसिस्वाहा॥
यद्विद्वांसश्चाविद्वांसश्चैनश्चकृमतस्या
वयजेनमसिस्वाहा॥ एनसएनसोवयज
नमस्वाहा॥३४॥ यद्वोदेवाश्चकृमजिह्वया
गुरुमनसोवाप्रयुतीदेवहेडनं॥ अरावा
योनोअभिदुछुनायतेतस्मिंतदेनोवस
वोनिधेतनस्वाहा॥३५॥ कामोकार्षीन्नमो

॥३५॥

नमः ॥ कामोकार्षीत्कामः करोति नाहं करो
मि कामः कर्ता नाहं कर्ता कामः कारयिता ना
हं कारयिता एष ते काम कामाय स्वाहा ॥ १ ॥ म
न्युरकार्षीन्नमो नमः ॥ मन्युरकार्षीन्मन्युः क
रोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः
कारयिता नाहं कारयिता एष ते मन्यो मन्यवे
स्वाहा ॥ २ ॥ तिलांजुहोमि सरसां सपिष्टा

नंधारममम्चित्तेरमंतु स्वाहा ॥ गावो हिरण्यं
धनमन्नपानं सर्वेषां श्रिये स्वाहा ॥ श्रियं
चलक्ष्मिंच पुष्टिंच कीर्तिंचानृण्यतां ॥ ब्रह्मण्यं
बहुपुत्रतां ॥ श्रद्धामेधे प्रजाः संददातु स्वा
हा ॥ ३७ ॥ तिलाः कृष्णास्तिलाश्वेतास्तिलाः सौ
म्यावशानुगाः ॥ तिलाः पुनंतु मे पापं यत्किं
चिद्दुरितं मयि स्वाहा ॥ चोरस्यान्नंनवः श्रा

ॐ ब्रह्महा गुरुतल्पगः॥ गोस्तेयं सुरापानं
भ्रूणहत्या तिलाः शांतिं शमयंतु स्वाहा॥ श्री
श्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चानृण्यतां॥ ब्रह्म
ण्यं बहुपुत्रतां॥ श्रद्धा मेधे प्रज्ञा तु जातवेदः
संददातु स्वाहा॥ ३८॥ प्राणापानव्यानोदान
समाना मे सुध्यंतां ज्योतिरहं विरजा विपाप्मा
भूयासं स्वाहा॥ वाङ्मनश्चक्षुश्रोत्रजिव्हाघ्रा

णरेतोबुद्ध्याकूतिः संकल्पा मे सुध्यंतां ज्यो॰ ॥
त्वक्चर्ममांꣳसरुधिरमेदोमज्जास्नायवोस्थी
नि मे शुध्यंतां ज्यो॰ ॥ शिरःपाणिपादपार्श्वपृ
ष्ठोरूदरजंघशिश्नोपस्थपायवो मे सुध्यंतां
ज्यो॰ ॥ उत्तिष्ठपुरुषहरितपिंगललोहिताक्षि
देहि देहि ददापेता मे सुध्यंतां ज्यो॰ ॥ ३१ ॥ पृथि
व्यापस्तेजोवायुराकाशा मे सुध्यंतां ज्यो॰ ॥ शब्द

स्पर्शरूपरसगंधा मे शुध्यंतां ज्यो० ॥ मनोवा
क्कायकर्माणि मे शुध्यंतां ज्यो० ॥ अव्यक्तभावै
रहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासं
स्वाहा ॥ आत्मा मे शुध्यंतां ज्यो० ॥ अंतरात्मा मे
शुध्यंतां ० ॥ परमात्मा मे शुध्यंतां ० ॥ क्षुधे स्वाहा ॥
क्षुत्पिपासाय स्वाहा ॥ विविट्यै स्वाहा ॥ ऋग्वि
धानाय स्वाहा ॥ कषोत्काय स्वाहा ॥ क्षुत्पिपासा

मेलंज्येष्ठामलक्ष्मीर्नाशयाम्यहं ॥ अन्नं त्रिमसे
मृद्धिंच सर्वान्निर्णुद मे पाप्मानं स्वाहा ॥ अन्नम
य प्राणमय मनोमय विज्ञानमय मानंदमय
मात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भू
यासं स्वाहा ॥ ५० ॥ अग्नये स्वाहा ॥ विश्वेभ्यो
देवेभ्य स्वाहा ॥ ध्रुवाय भूमाय स्वाहा ॥ ध्रुवक्षि
तये स्वाहा ॥ अच्युतक्षितये स्वाहा ॥ अग्नये स्वि

ष्टकृते स्वाहा॥ धर्माय स्वाहा॥ अधर्माय स्वाहा॥
अद्भ्यः स्वाहा॥ ओंषधिवनस्पतिभ्यः स्वाहा॥
॥ रक्षोदेवजनेभ्यः स्वाहा॥ गृह्याभ्यः स्वाहा॥
अवसानेभ्यः स्वाहा॥ अवसानपतिभ्यः स्वा
हा॥ सर्वभूतेभ्यः स्वाहा॥ कामाय स्वाहा॥ अं
तरिक्षाय स्वाहा॥ यदेजति जगति यच्च चे
ष्टति नाम्नो भागोय नाम्ने स्वाहा॥ पृथिव्यै स्वा

हा॥ अंतरिक्षाय स्वाहा॥ २॥ दिवे स्वाहा॥ सूर्या
य स्वाहा॥ चंद्रमसे स्वाहा॥ नक्षत्रेभ्यः स्वा
हा॥ इंद्राय स्वाहा॥ बृहस्पतये स्वाहा॥ प्रजा
पतये स्वाहा॥ ब्रह्मणे स्वाहा॥ स्वधा पितृभ्यः
स्वाहा॥ नमो रुद्राय पशुपतये स्वाहा॥ ३॥
देवेभ्यः स्वाहा॥ पितृभ्यः स्वधास्तु॥ भूते
भ्यो नमः॥ मनुष्येभ्यो हंता॥ प्रजापतये स्वा

॥ ३१॥

हा॥ परमेष्ठिने स्वाहा॥ यथाकूपः शतधारः
सहस्रधारो अक्षितः॥ एवामे अस्तु धान्यं
सहस्रधारमक्षितं॥ धनधान्यै स्वाहा॥ येभू
ताः प्रचरंति दिवानक्तं बलिमिछंतो वितुद
स्यप्रेष्याः॥ तेभ्यो बलिंपुष्टिकामो हरामि म
यिपुष्टिंपुष्टिपतिर्दधातु स्वाहा॥४॥ ओष
धिवनस्पतिभ्य स्वाहा॥ अंतरिक्षाय स्वाहा॥ नमो

रुद्रायपसुपतयेस्वाहाविद्युद्दस्यप्रेष्ठएकंच॥
ॐतद्ब्रह्म॥ॐतद्वायुः॥ॐतदात्मा॥ॐतत्स
त्यं॥ॐतत्सर्वं॥ॐतत्पुरोर्नमः॥अंतश्चरति
भूतेषुगुहायांविश्वमूर्तिषु॥त्वंयज्ञस्त्वंवष
ट्कारःत्वमिंद्रस्त्वंरुद्रस्त्वंविष्णुस्त्वंब्रह्मत्वंप्र
जापतिः॥त्वंतदापआपोज्योतीरसोमृतंब्र
ह्मभूर्भुवःसुवरों॥१॥श्रद्धायांप्राणेनिविष्टो

मृतंजुहोमि॥ श्रद्धायामपाने निविष्टोमृतंजु
होमि॥ श्रद्धायांव्याने निविष्टोमृतंजुहोमि॥
श्रद्धायामुदाने निविष्टोमृतंजुहोमि॥ श्रद्धा
यांसमाने निविष्टोमृतंजुहोमि॥ ब्रह्मणि
म आत्मामृतत्वाय॥ अमृतोपस्तरणमसि॥
श्रद्धायांप्राणे निविष्टोमृतंजुहोमि॥ शिवोमा
विशाप्रदाहाय॥ प्राणायस्वाहा॥ श्रद्धायाम

पाने निविष्टो मृतं जुहोमि॥ शिवो मा विशा
प्रदाहाय॥ अपानाय स्वाहा॥ श्रद्धायां व्या
ने निविष्टो मृतं जुहोमि॥ शिवो मा विशा प्रदा
हाय॥ व्यानाय स्वाहा॥ श्रद्धायामुदाने निवि
ष्टो मृतं जुहोमि॥ शिवो मा विशा प्रदाहाय॥ उ
दानाय स्वाहा॥ श्रद्धायां समाने निविष्टो मृ
तं जुहोमि॥ शिवो मा विशा प्रदाहाय॥ समा

॥४१॥

नायस्वाहा॥ ब्रह्मणि म आत्मामृतत्वाय॥ अ
मृतापिधानमसि॥ २४॥ श्रद्धायां प्राणे निवि
श्यामृतं हुतं॥ प्राणमन्नेनाप्यायस्व॥ श्रद्धायां
मपाने निविश्यामृतं हुतं॥ अपानमन्नेना
प्यायस्व॥ श्रद्धायां व्याने निविश्यामृतं हुतं॥
व्यानमन्नेनाप्यायस्व॥ श्रद्धायामुदाने नि
विश्यामृतं हुतं॥ उदानमन्नेनाप्यायस्व॥

श्रद्धायाꣳ समाने निविश्यामृतꣳ हुतं॥ समा
नेमन्नेनाप्यायस्व॥१०॥ अगुष्ठमात्रः पुरुषों
गुष्ठं च समाश्रितः॥ ईशः सर्वस्य जगतः प्र
भुक प्रीणात्ति विश्वभुक॥११॥ वाङ्म आसन्॥
नसोः प्राणः॥ अक्ष्योश्चक्षुः॥ कर्णयोः श्रोत्रं
बाहुवोर्बलं॥ उरुवोरोजः॥ अरिष्टा विश्वान्यं
गानि तनूः॥ तनुवा मे सह नमस्ते अस्तु मा

मोहिंसीः॥२॥वयःसुपर्णाउपसेदुरिंद्रंप्रि
यमेधाऋषयोनाधमानाः॥अपध्वांतमूर्णुहि
पूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान्॥३॥प्रा
णानांग्रंथिरसिरुद्रोमाविशांतकः॥तेनान्नेना
प्यायस्व॥४॥ नमोरुद्रायविष्णवेमृत्युर्मेपा
हि॥५॥त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यः
स्त्वमश्मनस्परि॥त्वंवनेभ्यस्त्वमोषधीभ्यःत्वं

नृणां नृपते जायसे शुचिः ॥२॥ त्रिवेनेमे संति
ष्ठस्व स्तोमेनेमे संतिष्ठस्व सुभूतेनेमे संतिष्ठस्व
ब्रह्मवर्चसेनेमे संतिष्ठस्व यज्ञस्यर्द्धिमनु संति
ष्ठस्वोपते यज्ञ नम उपते नम उपते नमः ॥१॥
सत्यं परं परꣳ सत्यꣳ सत्येनन सुवर्गाल्लोका
च्यवंते कदाचन सताꣳ हि सत्यं तस्मात्सत्ये
रमंते तप इति तपो नानशनात्परं यद्धि परं

॥४३॥

तपस्तदुर्द्धर्षंतद्दुराधर्षंतस्मात्तपसिरमंते
दमइतिनियतंब्रह्मचारिणस्तस्माद्दमेरमंते
शमइत्यरण्येमुनयस्तस्माच्छमेरमंतेदानमि
तिसर्वाणिभूतानिप्रशंसंतिदानान्नातिदु
ष्करंतस्माद्दानेरमंतेधर्मइतिधर्मेणसर्वमि
दंपरिगृहीतंधर्मान्नातिदुष्करंतस्माद्धर्मेर
मंतेप्रजनइतिभूयांसस्तस्माद्भूयिष्ठाः

प्रजायंते तस्माद्गुप्तिष्ठाः प्रजननेरमंते ग्नय
उ यो हुतस्मादग्नय आधीयंत तव्या अग्निहोत्र
मित्याहुतस्मादग्निहोत्रेरमंते यज्ञ इति यज्ञो
ह्येवास्तस्माद्यज्ञेरमंते मानुसमिति विद्वा
ंसस्तस्माद्विद्वांस एव मानुसेरमंते न्या
स इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा ता
नि वा एतान्यवराणि परांसि न्यास एवाय

॥४४॥

रिञ्च पृथगेवं वेदेत्युपनिषत् ॥ ७८॥ प्राजाप
त्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपस
सार किं भगवंतः परमं वदंतीति तस्मै प्रोवा
च सत्येन वायुरावाति सत्येनादित्यो रोचते दि
वि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं त
स्मात्सत्यं परमं वदंति तपसा देवा देवताम
ग्र आयंतपसर्षयः सुवरन्वविंदंतपसा

सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठि
तं तस्मात्तपः परमं वदंति दमेन दांताः किल्बि
षमवधून्वंति दमेन ब्रह्मचारिणः सुवरगच्छं
दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्मा
द्दमः परमं वदंति शमेन शांताः शिवमाचरं
ति शमेन नाकं मुनयो न्वविंदं छमो भूतानां
दुराधर्षं छमे सर्वं प्रतिष्ठितं तस्माछमः प

॥४५॥

रमंवदंतिदानंयज्ञानांवरूथंदक्षिणालोके
दातारंसर्वभूतान्युपजीवंतिदानेनारातीं
रपानुदंतदानेनद्विषंतोमित्राभवंतिदानेस
र्वंप्रतिष्ठितंतस्माद्दानंपरमंवदंतिधर्मोवि
श्वस्यजगतःप्रतिष्ठालोकेधर्मिष्ठंप्रजाउप
सर्पंतिधर्मेणपापमपनुदंतिधर्मेसर्वंप्र
तिष्ठितंतस्माद्धर्मंपरमंवदंतिप्रजननंवै

प्रतिष्ठालोकेसाधुप्रजायास्तंतुंतन्वानःपि
तृणामनृणोभवतितदेवतस्याअनृणंतस्मा
त्प्रजननंपरमंवदंत्यग्नयोवैत्रयीविद्यादेवया
नःपंथागार्हपत्यऋक्पृथिवीरथंतरमन्वा
हार्यपचनंयजुरंतरिक्षंवामदेव्यमाहवनी
यःसामसुवर्गोलोकोबृहत्तस्मादग्नीन्परमंव
दंत्यग्निहोत्रंसायंप्रातर्गृहाणांनिष्कृतिःस्वि

ष्टꣳसुहुतंयज्ञक्रतूनांप्रायणꣳसुवर्गस्यलो
कस्यज्योतिस्तस्मादग्निहोत्रंपरमंवदंतिय
ज्ञइतियज्ञेनहिदेवादिवंगतायज्ञेनासुरान
पानुदंतयज्ञेनद्विषतामित्राभवंतियज्ञेस
र्वंप्रतिष्ठितंतस्माद्यज्ञंपरमंवदंतिमानसंवै
प्राजापत्यंपवित्रंमानसेनमनसासाधुपश्य
तिमानसाऋषयःप्रजाअसृजंतमानसेस

वैप्रतिष्ठितंतत्तस्मान्न्यासंपरमंवदंतिन्या
सइत्याहुर्मनीषिणोब्रह्माणंब्रह्माविश्वःकत
मःस्वयंभुःप्रजापतिःसंवत्सरइतिसंवत्स
रोसावादित्योयएषआदित्येपुरुषःसपरमे
ष्ठीब्रह्मात्मायाभिरादित्यस्तपतिरश्मिभिस्ता
भिःपर्जन्योवर्षतिपर्जन्येनौषधीवनस्पत
यःप्रजायेंतओषधीवनस्पतिभिरन्नंभव

स्येनेन प्राणाः प्राणेर्बलं बलेन तपस्तपसा
श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया
मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृ
तिं स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञाने
नात्मानं वेदयति तस्माद्दन्नं ददन्सर्वाण्ये
तानि ददात्यन्नात्प्राणा भवंति भूतानां प्राणे
र्मनो मनसश्च विज्ञानं विज्ञानादानंदो

ब्रह्मयोनिःसवाऽएषपुरुषःपंचधापंचात्मा
येनसर्वमिदंप्रोतंपृथिवीचांतरिक्षंचद्यौश्च
दिशश्चावांतरदिशाश्चसवैसर्वमिदंजग
त्सभूतंसभव्यंजिज्ञासक्लृप्तऋतजार
यिष्ठाश्रद्धासत्योमहस्वांतपसोवरिष्ठाज्ञा
त्वातमेवंमनसाहृदाचभूयोनमृत्युमुप
यातिविद्वांतस्मान्यासमेषांतपसामति

रित्युमातुर्वसुरण्यो विभुरसि प्राणेत्वम
सि संधाता ब्रह्मंस्त्वमसि विश्वसृक्तेजो
दास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य
द्युम्नोदास्त्वमसि चंद्रमसउपयामगृही
तोसि ब्रह्मणेत्वा महस ओमित्यात्मानं युंजी
तैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद
ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महि

मानमित्युपनिषत्॥७९॥ तस्यैवंविदुषोय
ज्ञस्यात्मायजमानः श्रद्धापत्नीशरीरमि
ध्ममुरोवेदिर्लोमानिबर्हिर्वेदःशिखाहृद
यंयूपःकामआज्यंमन्युःपशुस्तपोग्निर्दमः
शमयितादक्षिणावाग्घोताप्राणउद्गाताच
क्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीद्यावद्ध्रिय
तेसादीक्षायदश्नातितद्धविर्यत्पिबति

॥५१॥

तदस्य सोमपानं यद्रमते तदुपसदो यत्सं
चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मु
खं तदाहवनीयो या व्याहृतिराहुतिर्यद
स्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्स
मिधं यत्प्रातर्मध्यंदिनं सायं च तानि सव
नानि ये अहोरात्रे ते दर्शपूर्णमासौ येर्द्धमा
साश्च मासाश्च ते चातुर्मास्यानि य ऋतव

स्तेपशुबंधायेसंवत्सराश्चपरिवत्सराश्च
तेहर्गणाःसर्ववेदसंवाएतत्सत्रंयन्मरणं
तदवभृथएतद्वैजरामर्यमग्निहोत्रंसत्रं
यएवंविद्वानुदगयनेप्रमीयतेदेवानामेव
महिमानंगत्वादित्यस्यसायुज्यंगच्छत्यथयो
दक्षिणेप्रमीयतेपितॄणामेवमहिमानंग
त्वाचंद्रमसःसायुज्यंसलोकतामाप्नोत्ये ॥५०॥

तौवै सूर्याचंद्रमसौ महिमानौ ब्राह्मणो वि
द्वानभिजंयति तस्माद्ब्राह्मणो महिमानमा
प्नोति तस्माद्ब्राह्मणो महिमानं ॥ ८ ॥ ओं मे स्वे
कं पंचाग्राघ्नेतेजातवेदसे चतुर्हस्रामरत्नं
नेरग्नये पुमेर ग्नये पंचैकैमेकं पाहि पाहि चत्वा
रि चत्वारि यश्च हसां हेनमो ब्राह्मणक्तं तपो
यथां चतुस्रसैस्यकैमेकमग्नेरणीयाएं श्चतुस्त्रि

ॐ शासरुस्तश्रीत्रैंष ॐ वद्धिं ॐ शान्तिरादित्योवा
एषआदित्योवैतेजएकमेकंनिधनपतये
त्रयोवि ॐ शान्तिः सद्योजातंत्रीणिवामदेवाये
कंमुघोरेभ्यस्तत्पुरुषायदेदेईशानोनमोहि
रण्यबाहवेएकमेकमृतं ॐ सत्यंदेसर्वोवैच
त्वारिकद्रुद्रायत्रीणियस्यवैकंकतीचरुषु
पाजोदित्तिरापोवादेमेकमेकमापःपुनंतु

॥५१॥

चत्वार्यग्निश्च सूर्यश्च नवे नु यो गिमि ति चत्वा
र्यायां तु पं चे यो जोऽसि हृ श्रो त्त मे चत्वारि द्व णि स्त्री
णि ब्रह्म मे तु मां पास्ते ब्रह्म हृस्या ठा दं ड्रा ब्रह्म मे
घ या घ्या नं इं मं त्र ला हृस्यां ब्रह्म मे घ वां ब्रह्मा दे
या नां मि इं वीं र हृस्या मे कान्न वि ष्णुं ज्ञा तिरे कान्न
वि ष्णुं ज्ञा ति मे ध्या दे वी मे धा म्नु इं द्रं श्च त्वा रि च त्वा
यी मां मे धा ह म यि मे धा मे कु मे पै तु पं वा तं त्रा ॥

मेमुत्र्यमस्याद्दुरिपुंग्रात्कैरग्निंमादिष्टेहोमस्यो
मानोमहांतमानस्तोके प्रजापतेस्वस्तिदास्थं
बंकेपेतैसरुस्तमयुतंहेहैमृस्यवेस्वोहेकंद्रव
चेतस्येकोहत्रायहोहेवाः कामोकार्षीन्मन्युकी
षींहेहैतिलांजुहोमिगावः श्रियंप्रजाः पंचति
लाः स्वछाश्योरंस्यश्रीप्रज्ञातुजातवेदसप्रा
णापानव्याकूत्वकूशिरस्तुस्तिष्टपुरुषपंचप

।।५२।।

थिवीशब्दमनोवागव्यक्तांतरात्मापरमात्मा
मेशुध्येत्रमयपंचदशाग्नयेस्वाहेकंचत्वारि
ंशाहेंतकृत्स्ननवश्रद्धायांप्राणेनिविश्यामृतं
जुहोमिचतुर्विंशतिश्रद्धायांप्राणेनिवि
श्यामृतंहुतेदशांगुष्ठमात्रःपुरुषोदेवात्म
आसन्नश्चैवयःसुपर्णाःप्राणानांग्रंथिरसि
देहेनमोरुद्रायैकंत्वमंगेस्तुमिर्देहिशिवेनमे

संतिष्ठस्व सुसंप्रोजापुत्रस्तस्यैव मेकमेक
मब्रीतिः ॥ सह नोववतु ॥ सह नौ भुनक्तु ॥ स
ह वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु मा
विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ ५ ॥
॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

॥ इति नारायण समाप्तः ॥ पत्रे ५४ ॥

॥ ५४ ॥

```
[OrderDescription]
,CREATED=23.01.20 14:30
,TRANSFERRED=2020/01/23 at 14:43:42
,PAGES=109
,TYPE=STD
,NAME=S0002643
,Book Name=M-2454-ITI NARAYAN PATRE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
```

```
FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
```

```
FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,
```